# Brahmavishnvadidevaih Krita Shiva Stuti 2

# ब्रह्माविष्ण्वादिदेवैः कृता २ शिवस्तुतिः

## Document Information

Text title : Brahmavishnvadidevaih Krita Shiva Stuti 2

File name : brahmAviShNvAdidevaiHkRRitAshivastutiH2.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 19 | 1-11||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 9, 2024

*sanskritdocuments.org*

# ब्रह्माविष्ण्वादिदेवैः कृता २ शिवस्तुतिः

(शिवरहस्यान्तर्गते ईश्वराख्ये)

देवाः ऊचुः ।
देव देव महादेव शरणागतवत्सल ।
मन्दार सुन्दर सुममरन्दस्राविपत्प्रभ ॥ १॥

महाहिकटकद्योन्तिविद्योताङ्ग महेश्वर ।
गरधृक्कण्ठकण्ठीर कुटीभूतजगत्त्रय ॥ २॥

विश्वाधिकाशावसन सनातन नमोऽस्तु ते ।
गिरीन्द्रजाकुचाश्लेषपुलकाञ्चितविग्रह ॥ ३॥

पतङ्गशिखिसोमादिविलोकन गरादन ।
(सूर्याग्निसोमनयनविलोकन गरादन) ।
इभवक्त्राब्जलोकार्कविलोकनयनाव्यय ॥ ४॥

उग्र भीम भवामेय पाहि पाहि महेश्वर ।
गजान्धकासुरहर मत्तानङ्गाङ्गनाशक ॥ ५॥

महाकैलासनिलय जगद्विलयशङ्कर ।
किङ्कराञ्छरणापन्नानापन्नान् पाहि शङ्कर ॥ ६॥

महोक्षध्वज कामारे मां सदा पाहि शङ्कर ।
पिनाकपाणे खट्वाङ्गिन् खण्डपर्शो शिवप्रभो ॥ ७॥

व्योमकेश भवामेय दक्षाध्वरनिवारक ।
कपालपाणे भगवन् रुद्रानन्त प्रभो हर ॥ ८॥

फणिभूषण शान्तात्मन् कृत्तिवासो महेश्वर ।
हिरण्यबाहो देवेश कुण्डलीशविभूषण ॥ ९॥

शूलपाणे विश्वमूर्ते वेदवेदान्तबोधित ।

कर्पूरगौर गौरीश गङ्गापूरजटाधर ॥ १०॥

कृपासागर भावात्मन् शम्भो साम्ब सदाशिव ।
त्रिपुरासुरसन्त्रस्तानस्मान् पाहि जगत्प्रभो ॥ ११॥

॥ इति शिवरहस्यान्तर्गते ब्रह्माविष्ण्वादिदेवैः कृता शिवस्तुतिः २ सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । ईश्वराख्यः दशमांशः । अध्यायः १९ । १-११॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 19 . 1-11..

Notes:
Brahmā ब्रह्मा, Viṣṇu विष्णु, Indra इन्द्र et al Deva-s देवाः; collectively eulogize Śiva शिव who had appeared on the scene when they had prayed to Him seeking relief from the distress they had been facing due to the atrocities being caused by Tripurāsura त्रिपुरासुर. They iterate their request to Śiva शिव.

Proofread by Ruma Dewan

*Brahmavishnvadidevaih Krita Shiva Stuti 2*

pdf was typeset on September 9, 2024

Please send corrections to *sanskrit@cheerful.com*